महिम्नस्तोत्रप्रारम्भः॥

श्रीगणेशाय नमः॥ ॐ नमः श्रीशंकराय नमः॥ हे भगवन् ते तव महिम्नः परं पारं अविदुषः पुंसः अजानतः पुरुषस्य स्तुतिर्यदि असदृशी स्यात् अननुरूपा अयोग्या भवेत् तथा ब्रह्मादीनामपि गिरः त्वयि विषये अवसन्ना भवेयुः निःफला भवन्ति एतस्मात्कारणात् न केवलमस्माकमेव स्तुतेरनधिकारित्वं प्रतिप्र लादेरपि तथैव स्यादित्यर्थः। एतेन पूर्वार्द्धेन स्तुतेरनधिकारित्वं प्रतिपादितं॥ उत्तरार्द्धेन साधिकारित्वं प्रतिपाद्यते॥

॥१॥ महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः॥ अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिकरः॥१॥ ॥१॥

हा॥ हे भगवन् अथैवं सर्वोऽयं जनः सर्वः स्वमत्योपि जनः स्वमतिपरिणामावधिः स्वकीयामतिस्तस्याः परिणामः परिपाकः स चावधिः सीमा मर्यादा यत्र तत् स्वमतिपरिणामावधि यथा भवति एवं गृणन् स्तुवन् अवाच्योऽनुपालंभो भवति निर्दोष एव॥ एवं सति हे हर दीनार्त्तिहर अस्मिन् स्तोत्रे ममापि एष परिकरः आरम्भो निरपवादो निर्दोष एव॥१॥ हे भगवन् पन्तव महिमा वाङ्मनसयोः पन्थानं अतीत एव वाचश्च मनस्व

श्रीमन्तो नमः

भवावतो शेषशास्त्रकर्तृत्वं प्रतिपादनाय आत्मनश्चौद्धत्यपरिहाराय स्तुवन्नाह॥ मधुइति। हे भगवन् मम स्तुत्या तव
तुष्टिर्नास्त्येव। किं कुर्वतः तव वाचो गिरो निर्मितवतः। सृष्टवतः। कथंभूताः वाचः मधुस्फीताः कोमला माधुर्यगुणा
श्रिताः सालंकारा इत्यर्थः पुनः कथंभूताः परमं अमृतं परमात्मतत्स्वरूपाः। पर[illegible] मात्मतत्स्वरूपास्त्वयोच्यन्ते॥ उप
चारा देहान्तानि ब्रह्मनिष्ठाः। एतेन किमुक्तं एवंविधाः स्वर्गापवर्गयोर्निष्ठा वाचो गिरो निर्मितवतः॥ सुरगुरो

।।१।। मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम्॥
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन्पुरमथन बुद्धिर्व्यवसिता॥३॥ ।।२।।

रपि वाक् किं तव विस्मयपदं भवति। आश्चर्यस्थानं भवति॥ अपितु न भवतीत्यर्थः॥ किं पुनरस्मदादेः॥ अहो पये
वंतर्हि किमर्थं स्तुतौ प्रवर्तसे। सत्यं तु पुनः॥ हे पुरमथन हे त्रिपुरदहन अस्मिन् स्तुतिलक्षणेऽर्थे मम बुद्धिरिति
कारणाद्व्यवसिता॥ कृतोद्यमा। इतीति किम्। अहं भवतो गुणकथनपुण्येन एतामात्मीयां वाणीं पुनामि पवि
त्रीकरोमि॥३॥

...यानन्तत् अतत् अतद्रूपा चासौ व्यावृत्तिश्च अतद्व्यावृत्तिस्तया अतद्व्यावृत्त्या उ
वाङ्मनसे [illegible] नयोः वाङ्मनसयोः एते च किंभूते वाङ्मनसे सर्वार्थविषयिणी। ताभ्यामपि स तव महिमा अवधारयितुं परिज्ञातुं न शक्य
ते॥ न च प्रत्यक्षेन अनुमानेन गृह्यते। सकः यं तव महिमानं श्रुतिरपि वेदोऽपि चकितमभिधत्ते भीमभावोद्भूते। न निश्चयतः कथा
अतद्व्यावृत्त्या इदंभूतो महिमा कस्य स्तोतव्यः। अपितु न कस्यापीत्यर्थः॥ तथा कतिविधगुणास्तस्य भगवतः किं च तोगु

अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि॥
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः॥२॥

णाः ते परिज्ञातुं न शक्यन्ते कस्य विषयः कस्य गोचरो भवेत् अपितु न कस्यापीत्यर्थः॥ एतेन निःफलस्य तूष्णीं स्तुतेरन
धिकारित्वं प्रतिपादितं सफलस्य वक्तव्यत्वं प्रतिपादयन्नाह। तु पुनः अर्वाचीने सृष्टिस्थितिप्रलयसम्भवस्थानरूपे पदे
स्थाने कस्य मनो न पतति वाचो वा कस्य न प्रसरन्ति अपितु सर्वेषामपि वाचश्च प्रसरन्ति॥२॥

दुरात्मनां नामेव व्याख्यातो धीं प्रकटयन्नाह ॥ खलु निश्चितं स धाता स कर्त्ता त्रिभुवनं सृजति त्रिभुवनसृजने का ईहा का चेष्टा कि
पदिस्पन्दनं क्रिया तथा किंकायः सन् त्रिभुवनं सृजति ॥ तथा किमुपायः स धाता किमुपायः सन् त्रिभुवनं किमुपा
दानं किंकारणं किंनिमित्तं ॥ अयमिति कुतर्कः कांश्चित् हतधियो मन्दमतीन् मुखरयति । वाचालयति किम

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादानमिति च ।
॥३॥ अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥५॥

यं जगतो मोहाय विप्रतारणाय नरकगमनाय च । कथंभूतः कुतर्कः त्वयि विषये । अनवसरदुःस्थो दुर्बल इति किं ॥३॥
3 भूते त्वयि अतर्क्यैश्वर्ये । अचिन्त्यमहत्त्वे प्रतर्कतं कर्म कृच्छ्र पाकृते देहमिश्च पावितनुर्भवेत् । कीदृशे भ
गवान् लोके वासकी इनके रिव ॥५॥

आत्मन्नतु नैमासिकाख्यातं अव्यभिचारि तं प्रतिपादयदानीं सर्वज्ञत्वं सर्वकर्तृत्वं प्रति केचिद्विप्रतिपाद्य
न्ते॥ मीमांसकादयस्तन्मतनिराकरणाय अनेन पद्यप्रमाणेन न्यासपरेण श्लोकत्रयेण भगवन्तं स्तुवन्ति
न्याह॥ हे भगवन् हे वरद यत्तव ऐश्वर्यं न भवतां निःस्त्रिप्रंत्र्यारोपितं च। कास्तुतिस्त्रयुनत्रयं कथंभू
नाम्नु त्र्यामिन्नासु गुणाः सत्वरजस्तमांसि तैर्भिन्नाः पृथग्भूता गुणाभिन्नासु॥ कथंभूतं तवैश्व
र्यं यत्तज्जगदुदयरक्षाप्रलयकृत्वपीव त्रयुवस्तीति सृष्टुगुणभिन्नासु तनुषु॥
अभव्यानामस्मिन्वरदरमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः॥ ४॥
र्यं जगदुदयरक्षाप्रलयकृत् त्रयाणां जगतां उदय उत्पत्तिः रक्षा परिपालनं प्रलयो विनाश एते॥ भावान्करोतीति॥ पुनः
कथंभूतं त्रयीवस्तु त्रयीषु वेदेषु वेदत्रयी। अपवर्गस्त विष्णुरुद्रात्मकं रूपं। हे भगवन् इह मर्त्यलोके एके जडधि
को मन्दमतयः पापिष्ठा मीमांसकादयस्त्वैश्वर्यस्यैश्वर्यं निराकर्तुं व्याक्रोशीं निन्दां विदधति कुर्वन्ति कथं
भूतां व्याक्रोशीं अभव्यानां पापिष्ठानां रमणीयां सज्ञो पुनः कथंभूतां अस्मिन् सर्वज्ञादिगुणो
पेते तवैश्वर्ये अरमणीयां॥ ४॥

त्रयी वेदविहितो मार्गः सांख्यं कापिलं शास्त्रं पंचविंशति तत्वोपलक्षितं च। तथा योगः संबंधः तत्प्रधानत्वात्
न्यायशास्त्रं वैशेषिकशास्त्रं च॥ तथा पशुपतिमतं शास्त्रं तत्सिद्धान्ताः परिकीर्तिताः। सोमसिद्धान्तशै
वसिद्धान्त नाकुलसिद्धान्त पंचार्थसिद्धान्ताः इत्यादयः॥ तथा वैष्णवं श्रीवैष्णवपंचरात्रं च नारदपंचरात्र
योर्गहोत्सम्। इतिशब्दः समाप्तौ वर्तते। एतत्पंचसंख्यापरिच्छिन्नप्रस्थाने एतस्मिन्प्रस्थाने प्रभिन्ने

॥४॥ त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च॥ ॥४॥
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥७॥

सति पथ्यं मार्गमिति अहंकारोपेताः केचन छापि न इति भुवते॥ यत इदं परं तत्वं तस्मात्परतरं नास्ति।
अदः पथ्यं न्यासं च॥ तस्मात्सेवनीयमस्ति। कस्मात् रुचीनां वैचित्र्यात्। रुचयो विचित्राः यदुक्तं एकमे
वपरं तत्वं भिन्नं परमार्थतः॥ तेर्दवरुचिवैचित्र्यान्नानात्वं समुपागतं। हे भगवन्। ऋजुकुटिलनाना
पथ्यजुषां पयसाम्। एकोसि त्वं पथ्यागम्य त्वियातम्॥७॥

हे भगवन् अमी भूर्भुवः स्वः प्रभृतयः सप्तलोकाः अवयववन्तोपि अजन्मानः एषां जन्म न विद्यते येषां तादृशाः एवं न लभ्यते ॥ यथाङ्कुरः । तथा लोकाः सावयवाः सावयवत्वाज्जन्मवन्त एव । हे भगवन् भवविधिः सृष्टिविधानं जगतां अधिष्ठातारं चेतनं निमित्तकारणं ईश्वरं किं अनादृत्य भवति । अनपेक्ष्य भवति । नैव कर्त्तारमपेक्षते । एवं दि क्काल धर्माधर्म परमाण्वादि प्रभृतीनि चेतनान्यानि चेतनाधिष्ठानस्वीकृतानि स्वकार्ये प्रवर्त्त न्ते । एवं तेन नाधिष्ठानस्वीकृतेन कार्योत्पत्तौ प्रवर्त्तन्ते ॥ अथ यथाभिधीयते वा यदि अनीशः कुर्यात् महेश्वर व्यतिरिक्तः कश्चित्कर्त्ता तदा तस्य अनीशस्य भुवनजनने भुवनोत्पादने विधौ कः परिकरः का सामग्री ॥ हे अमरवर यतः कारणाद् इमे मन्दाः पापिष्ठाः मीमांसकादयः त्वां प्रति संशेरते । संदेहं कुर्वन्ति । त्वां प्रति संदेहो नास्तीति तात्पर्यार्थः ॥६॥

अजन्मानो लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥

हे भगवन् हे पुरमथन कश्चिन्मत्स्त्वदर्शनानुपायी सकलं समस्तं जगदिदं ध्रुवं गदति। अविनश्वरं कथयति। अपरो बौद्धः दंभः [illegible] सकलं जगदिदं अध्रुवं नाशिकं गदति। हे भगवन्। एतस्मिन् समस्तेपि जगति व्यस्त विषयेपि। सति विचित्रप्रमाणाभूमौ सत्यां अहं तैर्भेदवादिभिर्विस्मित इव विस्मितोत्पन्नो मोहं प्रापित इव त्वां

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये॥
समस्तेप्येतस्मिन् पुरमथन तैर्विस्मित इव स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा ॥५॥
मुखरता ॥८॥

स्तुवन् जिह्रेमि लज्जे अहो यद्येतर्हि। कथं स्तुतौ प्रवर्त्तसे॥ सत्यमिदं ननु अहो खलु निश्चयेन न मुखरता न
वाचालता धृष्टा अपितु धृष्टैव ॥८॥

महोक्षा इति। हे वरद त्वं च एतत् तन्त्रोपकरणं मात्रापरि छद्य न्यसतां दृष्टान्तम्। महान् उक्षा महोक्षो वृषभः
[illegible] खट्वाङ्गं प्रसिद्धमेव अथ खट्वास्योपरि ब्रह्मकपालं खट्वा
ङ्गं कथ्यते। तथा परशुरवश्य विशेषः। अजिनं गजचर्म तथा भस्म दग्धगोमयं तथा फणिनः काद्रवेया नागाः।
तथा कपालं च इति शब्दैः समाप्तो वर्तते तु पुनः सुरदेवाः। भवद्भ्रूप्रणिहितां भवभ्रूपनीतां अनिर्वचनीयां
महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम्॥ सुरास्तां तामृद्धिं
दधति तु भवद्भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति॥८॥ ॥ ॥
ऋद्धिं दधति धारयन्ति अहो एवं तर्हि किं परं सम्पन्नं भुंक्ते नैवं वाच्यं यस्मात् कारणात् विषयमृगतृष्णा स्वात्मा
रामं पुरुषं योगिनं न भ्रमयति न चालयति एतेन भगवतः परमयोगित्वं प्रकटितम्॥८॥ ॥ ॥ ॥

हे भगवन्। दशास्यो रावणः बाहून् अभृत धृतवान् कथंभूतान् बाहून् रणकण्डूपरवशान् संग्रामव्यग्रान् किं कृत्वा
अवैरिव्यतिकरं निःकंटकं त्रिभुवनं अयत्नादासाद्य प्राप्य हे त्रिपुरदहन हरं तत् स्थिरायास्त्वद्भक्तेर्विस्फूर्जि
तं विलसितं कथंभूतायास्त्वद्भक्तेः शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः शिरांस्येव पद्मानि तेषां श्रे

अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरं दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्॥
॥६॥ शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जि ॥६॥
तमिदम्॥११॥

6

णीपंक्तिः तया रचितः आरोपितचरणाम्भोरुहबलिः पूजोपहारो यस्याः सा शिरःपद्मश्रेणीरचितचरणाम्भो
रुहबलिः तस्याः॥११॥

हे भगवन् विरंचिर्ब्रह्मलोकोपरि तनपक्षे हरिः स्तम्भः अधःपद्यो नवैश्वर्य्यपरिच्छेत्तुंपरिकल्पितुं अनलंयातौ अस
मर्थौ भूतौ। कथंभूतस्य तव अनिलस्कन्धवपुषः॥ अस्य एतेन किमुक्तम्। वायुतत्त्वपर्य्यन्तं लिङ्गं समस्तर्कं ब्र
ह्माग्निपर्य्यन्तं लिङ्गं समूर्तं। महतोऽव्याप्तिः विष्णुर्भगवान् अपतलगनिवासो कथमेतौ तवैश्वर्य्यपरिच्छेत्तुं
समर्थौ स्यातामिति अपितु न भवत इत्यर्थः॥ ततोऽनन्तरं तेन भगवता ताभ्यां ब्रह्मविष्णुभ्यां स्वयं तस्थे आ

तवैश्वर्य्यं यत्नाद्यदुपरि विरंचिर्हरिरधः परिच्छेत्तुं यातावनलमनिलस्कन्धवपुषः॥ ततो
भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति॥१०॥

त्मानमात्मनैव प्रकटयामास॥ किं कुर्वद्भ्यां भक्तिश्रद्धाभरगुरु यथा एवं गृणद्भ्यां यद्यस्मात्कारणात् भगवान्
कारुणिकः कारुणिकत्वात् स्वयं तस्थे आत्मानमात्मनैव प्रकटयामास हे गिरिश युक्तमेतत् अनुवृत्ति
स्तव सेवा किं न फलति। अपितु फलत्येवेत्यर्थः संगच्छते॥१०॥

हे वरद यद्वा सौ वाणासुरः सुत्राम्णो इन्द्रस्य ऋद्धिं अधश्चक्रे। कथंभूतां ऋद्धिं परमोच्चैरपि सतीं अत्यन्तमहतीमपि
॥ हे भगवन्। तस्मिन् वाणे तत्र चित्रं नाश्चर्यम्॥ कथंभूतो वाणः परिजनविधेयत्रिभुवनः। यत्र हि त्रीणि भुवनानि प्रथ
मं देयं पश्चादिदं। कथंभूते वाणे। त्वच्चरणयोर्वरिवसितरि॥ त्वच्चरणयोः पूजयितरि हे भगवन्॥ उक्तमेतत् त्वयि शिर
सः अवनतिः शिरोनमनं कस्यापि उन्नत्यै न भवति॥ अपि तु सर्वेषामेव ऐश्वर्यं भवति॥ हे त्रिनयन यः कल्माषः
।७। यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः॥ न तच्चित्रं तस्मिन्
7 वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥१३॥ अकाण्डब्रह्माण्डक्ष ।७।
यचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः॥ स कल्माषः कण्ठे तव न कुरुते
न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः॥१४॥
कृपापरवशः विषं संहृतवतः तव कण्ठे आसीत्। स कल्माषः कण्ठे श्रियं न कुरुते। अपि तु करोत्येव। कथंभूतस्य
तव अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्य अकाण्डे असमये ब्रह्माण्डस्य क्षयेण जगत्प्रलयेन
चकिता भीता देवा असुराश्च तेषु कृपाविधेयेन तस्य अहो उक्तमेतत् भुवनभयभङ्गव्यसनिनः परुषमपि

हेभगवन् अमुष्यराघवस्यत्वदधिवसतौ कैलाशेपि भुजवनं विक्रमपतः पाताले पि प्रतिष्ठा अलभ्या आसी
त् अप्राप्याबभूव। कस्माद्बलात्॥ कथंभूतं भुजवनं। त्वत्सेवासमधिगतसारं आप्तलभ्यम्। कसति लोलितस
लसचलितांगुष्ठशिरसि सति मन्दचलितांगुष्ठशिरसि सति॥ अहोयुक्तमेतत्। ध्रुवं निश्चितं खलोऽन्नी

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलाशेपि त्वदधिवसतौ विक्रमयतः।
असभ्या पाताले प्यलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितोमुह्य
तिखलः॥१२॥

नः ऽपचितः सन् परयालक्ष्म्या अलंकृतः सन् मुह्यति। मोहमुपागच्छति॥१२॥

आनिरस्तजडतानाऽतिततया। ननु। अहो उक्तमेतत्। यतो विभुना वामेऽवै परीत्यं विभुत्वं। यथा हे भगवन्‌ योवारां यास्तीयानं
प्रवाहः सततं व शिरसि पतन्‌ पृषतलघुदृष्टः। जलकणिकावत्‌ सूक्ष्मोऽदृष्टः॥ कथंभूतो वियद्व्यापी व्योमप्रवहनशीलः पृ
नः किंभूतः॥ तारागणगुणितफेनोद्गमरुचिः॥ तारा नक्षत्राणि तेषां समूहः॥ तेन गुणिताऽनुपमिता फेनोद्गम
उच्चियस्य सः॥ तेन प्रवाहेन जगद्द्वीपाकारं जलधिवलयं कृतम्। अमुनैव दृष्टान्तेन नवपुः॥ ऽन्येयं अनुभावनीयम्। कथंभूतं वपुः। दिव्यं दिव्यप्रभावयुक्तम्॥१७॥
अमुनामकारेण। अनेन वैदृष्टान्तेन नवपुः। ऽन्येयं अनुभावनीयम्।

॥१८॥ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः। प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते॥ जगद्द्वीपा
कारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिमदिव्यं तव वपुः॥१७॥ रथः क्षोणी
8 यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति॥ दिधक्षोस्ते
कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥१८॥
हे भगवन्‌ तेतव त्रिपुरत्रितयं दिधक्षोरयं कः आडम्बरविधिः उपकरणसामग्री क्षोणी किं क्षोणी पृथ्वी रथः। तत्र यन्ता सारथिः
शतधृतिः ब्रह्मा अगेन्द्रः पर्वतराजो हिमालयः धनुः। अथानन्तरं रथाङ्गे चक्रस्थाने चन्द्रार्कौ रथचरणपा

हे भगवन् यस्य स्मरस्य बाणाः सदेवासुरनरे जगति असिद्धार्थाः अकृतप्रयोजनाः क्वचिदपि नैव निवर्तन्ते स स्मरस्त्वामितरसुर
साधारणं यथा भवति अन्यदेवतुल्यं पश्यन् स्मर्त्तव्या ... त्मासीत् अभूत् स्मरणीयमशरीरो बभूव । कथंभूतः त्रिपिष्टपाः
नित्यं जयिनः जयशीलाः अहो युक्तमेतत् वशिषु जितेन्द्रियेषु परिभवो न पथ्यः न सुखकारी इत्यर्थः ॥१५॥ हे भगवन्
असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ॥ स पश्यन्नी
श त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥१५॥ महीपा
दाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् । मुहुर्द्यौर्दौ
स्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥ ॥
यं
हे जगद्रक्षायै नटसि नृत्यं करोषि जगतां रक्षणाय रक्षासंप्रताडनाय नटसि नृत्यं करोषि पुनर्महीपृथ्वी पादा
घातात्पादक्षेपणाच्चरणविन्यासात्सहसा संशयपदं व्रजति किं मुह्यति किमधः प्रविशति इति संशयपदं
तथा विष्णोः पदमाकाशं भ्राम्यद्भुजपरिघरुग्णग्रहगणं ... भ्राम्यद्भुजमण्डलैः रुग्णा भग्ना ग्रहगणाः
समूहा वर्तन्ते तथा द्यौः स्वर्गः अनिभृता धरा दौःस्थ्यं याति दुःस्थतां याति । कथंभूता द्यौः

॥५॥ [illegible]

तथा क्रतुपतिः तनुभृतां अधीशः तथा ऋषीणां आर्त्विज्यं आर्त्विज्यभावः तथा सुरगणाः देवसमूहाः सदस्याः सभ्याः एवं साम
ग्रीकस्य दक्षस्य त्वत्तः त्वत्सकाशात् क्रतुभ्रंशोऽभूत् यागविनाशो बभूव कथंभूतात्त्वत्तः क्रतुफलदानव्य
सनिनः॥ हि यस्मात्कारणात् एतन्मतम्॥ ध्रुवं निश्चितं मखा यागाः कर्तुर्यजमानस्य श्रद्धाविधुरम् अभिचा
राय भवन्ति विपरीतफलाय भवन्ति॥२१॥ हे नाथ हे स्वामिन् तेन च मृगव्याधरभसः आखेटकोत्साहः अद्यापि

॥श्री॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः॥ क्रतु
भ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः॥२१॥
प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा॥ धनुः
19 पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः॥२२॥

नापि अमुं प्रजानाथं न त्यजति कथंभूतस्य तव धनुःपाणेः कथंभूतं प्रजानाथं प्रसभं बलात्कारेण रोहिद्भूतां रोहिणी
भूतां स्वां दुहितरं प्रति ऋष्यस्य वपुषा मृगशरीरेण गतम् किं कर्तुं रिरमयिषुं रन्तुमिच्छुं पुनः कथंभूतं अभिकं
कामुकं अपरं कथंभूतं सपत्राकृतं बाणाभिविद्धं [illegible] दिवमपि यातम्। अद्यापि दिवसं [illegible] दिवमे

श्रमुपदिश्य तितनकरोतीति तात्पर्यार्थः॥१८॥ हे भगवन् हरिः कृष्णः ते तव पादयोः साहस्रं कमलबलिं आधाय दत्वापि तस्मिन्
साहस्रे एकोने सति निजं नेत्रकमलं उद्धरन् उत्पाटितवान् असौ भक्त्युद्रेकः परिणतिं गतः सन् त्रयाणां जगतां र
क्षायै जागर्ति स्फुरति केन चक्रवपुषा चक्रशरीरेण॥१९॥ हे भगवन् जनो लोकः अतः कारणात् कर्मसु विषयेषु श्रद्
दृढपरिकरो नाम भवतीति। श्रुतौ वेदे श्रद्धां बध्वा पुनः किं कृत्वा क्रतुषु यागेषु फलं प्रतिदानं प्रतिभुवं त्वां संप्रेक्ष्य क्रतौ

हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्॥ गतो भक्त्युद्रे
कः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम्॥१९॥ क्रतौ सुप्ते जाग्र
त्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते॥ अतस्त्वां संप्रेक्ष्य क्रतु
षु फलदानप्रतिभुवं श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः॥२०॥

यागे सुप्ते विनष्टे सति फलयोगे फलसंबन्धे जाग्रत् त्वमेव सावधानो भवसि॥ क्रतुमतां यागयाजिनां पुरुषाराधनं प्र ६२
ध्वस्तं कर्म प्रणष्टं कर्म पुरुषाराधनमृते क्व फलति अपितु न फलतीत्यर्थः॥२०॥ हे शरणद अभयप्रद दक्षो मुनिः
क्रियापरः क्रियायां कुशलः॥

[illegible]

मिति न ह्योरेण मयामतं च हीति यानि॰ करेखा पाश्वयार्क विभवा भरणां यान ह्रदे किमपि धारियन्तु सुप्रीमिमितो वं तपे न जयति॥
॥२५॥ हे भगवन् यमिनो योगिनः मनो ऽलंकारणं चित्ते स्वात्मनि सविधं आधाय समीपं कृत्वा प्रत्यकपश्चात् अ
न्तर्मुखेयन्ति मपि अनिर्वचनीयं तत्त्वं आलोक्य हृष्टा आ ऽह्लादं दधति॰ धारयन्ति किं वहूतिसत्यं तत् भवान्
कथंभूता यमिनः आत्तमरुतः आत्तो ऽवहितो मरुद्वायुर्यैस्ते आत्तमरुतः पुनः कथंभूताः प्रहृष्यद्रोमाणः
॥१०॥ मनः प्रत्यक् चित्ते सविधमवधायात्त मरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः॥
यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान्॥२५॥ ॥१०॥
त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च॥ परि
च्छिन्नामेवं त्वयि परिणता विभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि॥२६॥
सद्रोमाः गात्राः अपरं कथंभूताः प्रमदसलिलोत्संगितदृशः प्रमदसलिलानि हर्षाश्रूणि तैरुत्संगिताः परिपूर्णा दृशः
चक्षूंषि येषां ते तथोक्ताः नेत्रा येषां ते अमृतमये ह्रदे निमज्ज्य यथा आह्लादं धारयन्ति तथेयमुक्तश्चितापाकान्तो ऽमृतमये
सुधीतले ह्रदे निमज्ज्य आह्लादं दधति निमज्ज्य संगतिः ॥२५॥ हे भगवन् त्वमर्कः सूर्यस्त्वं सोमः चन्द्रः त्वं पवनो वायुः

[illegible]

देवुरमयन हे त्रिपुरहन्ता। यापि देवी पार्वती त्वां सेवमानो सम्यक् अवै नि जानाति किं कृत्वा यच्चापि विष्णुः पंचानन्दपि
पुराऽजो अन्याय भृ सेवन्तः रावत् सुखं दस्युं दक्षापि कस्मात् यमनिरत देहार्द्ध घटनात् कथंभूता देवी स्वला
वण्या शंसा स्वरूपाभिमानिनी अहो वत् कुतिसेदे अ ज्ञानि श्विनां हरस्य भुवनयो मुग्धाः द्वियोऽग्नी
नाः ॥२३॥ हस्मरहर नव भ्रमस्थानेषु श्रास समल्ला भावेन श्रीयात यापि श्राचाः सहचराः नित्यं क्रीडकारिणः
स्वलावण्याभ्यां सा च न धनुष मन्याय मत्ते रावत् पुरः पुरं दक्षापुरम यमनपुष्पायुधमपि॥ यदि
स्थैर्यं देवी यमनिरत देहार्द्ध घटनात् वेति बाम ज्ञावन यदम्मुग्धा भुवनयः॥२३॥ भ्रमस्थाने
ब्याक्रीडास्मरहर पिशाचाः सहचरा श्चिनामभस्मालेपः स्रगपि नृकरोटी परिकरः॥ अमंगल्यं
शीलं तव भवतु नामैवमखिलं तथापि स्मर्तृणां वरदपरमं मंगलमसि॥२४॥
तथा चिताभस्मालेपः चिताभस्मा नामं गलानाः नेभ्यो स्रगपि माला पि नृकरोटी परिकरः नृ
णां कानि मस्तकानि तेषां निकराः तस्मात् टीपरिदीपमस्पष्टः नामस्तुति से यो नेत्रान्तर एवं पूर्वोक्त प्रकारेणाखिल

[illegible]

रितमकाविकाराद्ध्येयस्य तत्त्वोऽस्य विकृति॰ निर्विकारमित्यर्थः ॥२७॥ हे भगवन् हे देव यत् इत्थं अभिधानाष्ट ॥३१॥
कं [ ] अमुष्मिन् अभिधानाष्टके श्रुतिर्वेदः प्रत्येकं प्रविचरति तत्किमभिधानाष्टकं भवः सर्वः
रुद्रः पशुपतिः अथोग्रः सहमहान् शब्देन महादेव उच्यते तथा भीमेशानौ अमुष्मिन् प्रत्येकं प्र
विचरति [ ] किमर्थं अस्मै धाम्ने प्रियायप्रीत्यर्थं हे भगवन् एवं रूपाय भगवते तुभ्यं

भवः सर्वो रुद्रः पशुपतिरथोग्रः सहमहांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ॥
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि ॥ प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥२८॥
नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ॥ नमो वर्षिष्ठाय
त्रिनयन यविष्ठाय च नमो नमः ॥ सर्वस्मै ते तदिदमिति सर्वाय च नमः ॥२९॥

प्रणिहितनमस्योऽस्मि कृतनमस्कारोस्मि ॥२८॥ हे भगवन् हे प्रियदव अभक्तानां प्रियं दुनोतीति प्रियदव तेतुभ्यं नेदिष्ठाय
निकटवर्त्तिने नमः दविष्ठाय नमः दूरस्थाय च नमः हे स्मरहर तुभ्यं क्षोदिष्ठाय नमः सूक्ष्मरूपाय नमः च अन्यत् तेतु
भ्यं महिष्ठाय नमः महते [ ] रूपाय नमः अपरं वर्षिष्ठाय नमः [ ]रूपाय नमः हे त्रिनयन तेयविष्ठाय

मिति च इति भावः समाप्तो वर्त्तते हे भगवन् परीरतानाः परिपक्वमतय स्त्वयि विषये एवं पूर्वोक्तप्रकारेण परिच्छिन्ना इयत्तां
वधारितां इयत्तां किलेत्यितिरं विभ्रतु पुनरिह जगति यत्तत्त्वं न विद्मः यत्त्वं न भवसि यत्किंचित्सदृश तानत्सर्वं भ
गवानिति भगवत्प्रतिरिक्तं किंचिन्नास्ति इति तात्पर्यार्थः ॥२६॥ हे भगवन् हे शरणद ॐमिति पदं त्वां गृणाति
स्तौति कथंभूतं ॐमिति पदं समस्तं व्यस्तं समस्तव्यापकं किं कुर्वत् ॐमिति पदं त्रयीं वेदत्रयीं अभिदधत् न केवलं त्रयीं
तिस्रो वृत्तीश्च उदात्तानुदात्तसमाहार भेदात् न केवलं तिस्रो वृत्ती त्रिभुवनं स्वर्गमर्त्यपातालं च पुनः किं कुर्वत्

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७॥

अकाराद्यैः अकार उकार मकारैः त्रिभिर्वर्णैः त्रीनपि सुरान् ब्रह्मविष्णुरुद्रान् अभिदधत् किं कुर्वत् ॐ
मिति पदं अणुभिः ध्वनिभिः ते तव तुरीयं धाम अवरुन्धानं स्वीकुर्वाणं किमपेक्ष्य तुरीयं धामेत्युच्यते
करणमावरण जाग्रदवस्थायां व्याप्तिः कण्ठताल्वपुष्पं तं स्वप्नावस्थायां व्याप्तिः एतान्याद्यवलोकन
पन्तं सुषुप्तावस्थायां व्याप्तिः ... व्याप्तिः शिवतत्त्वपर्यन्तं तुर्यावस्थाव्याप्तिरित्युच्यते पूर्वे

हे ईश हे स्वामिन् । असितगिरिसमं अञ्जनगिरितुल्यं कज्जलं स्यात् कस्मिंश्चित्पात्रे यदि सुरतरुशाखा लेखनी स्यात्
तु यदि सा शारदा सरस्वती उर्वीपत्रं हि सा सर्वकालं लिखति । तदपि तव गुणानां पारं न याति ॥३२॥ इति श्रीम
हिम्नस्तोत्रटीकासमाप्तेति शुभमस्तु ॥

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी । लिखति यदि गृहीत्वा शारदा सर्व
कालं तदपि तव गुणानामीश पारं न याति ॥३२॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो
॥१२॥ निर्गुणस्येश्वरस्य । सकलगुणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥ ॥१२॥
॥३३॥ कुसुमदशननामा सर्वगन्धर्वराजः [illegible] शशिधरमौलेर्देवदेवस्य दासः ॥ स्वगुरुनिजम
१२ हिम्नो भ्रष्ट एवास्य रोषात् स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥३४॥ सुरवरमुनिपूज्यं स्वर्गमो
क्षैकहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ॥ व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिद
ममोघं पुष्पदन्तप्रणीतम् ॥३५॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचि

शिव्या २

इ भगवन् विश्वोत्पत्तौ बहलरजसे प्रचुररजोगुणविशिष्टाय भवाय नमो नमः तत्संहारे प्रबलतमसे प्रचुरतमोगु
णोपाय हराय नमो नमः अपरं सत्वोत्पत्तौ सत्वगुणाधिष्ठाने सति जनसुखकृते जगत्संरक्षणकर्त्रे मृडाय
नमो नमः ॥३०॥ हे वरद भक्तिः इति अमुना प्रकारेण चकितं भीतं अमन्दीकृत्य प्रोत्साह्य ते तव चरणयोर्वाक्यपु

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः ॥ जनसुखकृते सत्वोत्पत्तौ
मृडाय नमो नमः। प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥ कृशपरिणति चेतः क्लेशवश्यं
क्व चेदं क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः ॥ इति चकितममन्दीकृत्य मां भक्तिराधाद्वरद चरण
योस्ते वाक्यपुष्पोपहारम् ॥३१॥

ष्पोपहारं आधात् दत्तवती इति किं मदीयं चेतः कृशपरिणति स्वल्पपरिणाम दुर्बलं पुनः कथंभूतं क्लेशवश्यं
अविद्याऽस्मिता रागद्वेष अभिनिवेशनाः रागः सुखेषु प्रीतिः द्वेषः अनुभूतादपि स्मरणाद्दुःखाभिनिवे
श इति क्लेशाः कथंभूता ऋद्धिः गुणसीमोल्लंघिनी गुणत्रयातीता ॥३१॥

न्तः पुमान् यः ॥ स भवति शिवलोके रुद्रतुल्यस्तथात्र प्रचुरतरधनायुः कीर्त्तिमान् पुत्रवांश्च ॥३६॥ महे
शान्नापरो देवो महिम्नो नापरा स्तुतिः ॥ अघोरान्नापरो मं त्रो नास्ति तत्त्वं गुरोः परम् ॥३७॥ श्रीपुष्प
दन्तमुखपंकजनिर्गतेन ॥ स्तोत्रेण किल्बिषहरेण हरप्रियेण कण्ठस्थितेन पठितेन समाहि
13 तेन सुप्रीणितो भवति भूतपतिर्महेशः ॥३८॥ समाप्तिमगमत् स्तोत्रं सर्वमीश्वरवर्णनम् ॥ अनू
पमं मनोहारि पुण्यं गंधर्वभाषितम् ॥३९॥ दीक्षा दानं तपस्तीर्थं होमयोगादिकाः क्रियाः ॥ महिम्न
॥१३॥ स्तव पाठस्य कलां नार्हन्ति षोडशीम् ॥४०॥ इति श्रीपुष्पदन्तगन्धर्वराजविरचितं महिम्नस्तोत्रं ॥१३॥
संपूर्णम् शुभमस्तु शुभं भूयात् श्रावणमासे कृष्णपक्षे अधिमासे पंचम्यां शुक्रवासरे पुस्त
कमिदम् लेखि जगन्नाथेन शर्मणा ॥

॥ महिम्नस्तोत्रंसमाप्तम् ॥

24